॥ શ્રી ॥
અથ શ્રી ત્રિવિક્રમપંડિતાચાર્યસુત શ્રી નારાયણપંડિતાચાર્યવિરચિતઃ
॥ શ્રી મધ્વવિજયઃ ॥
૪. ચતુર્થઃ સર્ગઃ

અથૈષ સલ્લોકદયાસુધાર્દ્રયા સદાગમસ્તેનનિરાસકામયા ।
રમાવરાવાસભુવા વિશારદો વિશાલયાઽચિંતયદાત્મનો ધિયા ॥ ૪.૧ ॥

અનન્યસંગાદ ગુણસંગિતા હરેર્જનસ્ય માનં તુ વિશિષ્ટચેષ્ટિતમ ।
અસંગમસ્માત પ્રકટીકરોમ્યહં નિજં ભજન પારમહંસ્યમાશ્રમમ ॥ ૪.૨ ॥
મમ પ્રભોર્નાપરથા હિ શોભતે દ્વિષત્સુ વિષ્ણું યદદંડધારણમ ।
હરિસ્વસા નન્વચિરાદસદ્ભિદે ભવેદતો નાસ્મિચ દંડધારકઃ ॥ ૪.૩ ॥

વિચિંતયન્નિત્થમનંતચિંતકઃ સમસ્તસંન્યાસનિબધ્ધનિશ્ચયઃ ।
અસાવનુજજાર્થમથાનમદ્ધરિં સમસ્તસંવ્યાપિનમાત્મદાયગમ ॥ ૪.૪ ॥

નિજે જને કિં નમસીતિ પૃચ્છતિ બ્રુવન સ્વસસ્તુપ્રણતિં વ્યધામિતિ ।
ગુરો કિલાન્વેષણવાન જગદ્ગુરુઃ તદા જગામાખિલલોકશિક્ષકઃ ॥ ૪.૫ ॥

યતિર્યતાત્માભુવિ કશ્ચનાભવદ્વિભૂષણો ભૂરિવિરક્તિભૂષણઃ ।
ન નામમાત્રાચ્છુચિમર્થતોઽપિયં જનોઽચ્યુતપ્રેક્ષમુદાહરત સ્ફુટમ ॥ ૪.૬ ॥

પુરૈષ કૃષ્ણાકરસિદ્ધશુદ્ધિમદ્ધરાન્નભુક્ત્યા કિલ પાંડવાલયે ।

વિશોધિતાત્મા મધુકૃત્પ્રવૃત્તિમાન્યચાર કાંશ્ચિત પરિવત્સરાન મુદા ॥ ૪.૭ ॥

અભૂત કુશાસ્ત્રાભ્યસનં ન પાતકં ક્રમાગતાદ વિપ્રતિસારતો યતેઃ ।
યથા કુશાસ્ત્રાધ્યસનં મુરદ્વિષઃ પદાંબુજે વ્યાધવરસ્ય ગર્હિતમ ॥ ૪.૮ ॥

વિનીતમાંનાયશિરોવિશારદં સદૈવ તત્ત્વં પ્રબુભુત્સુમાદરાત ।
ગુરુર્વિદિત્વોપનતાં નિજાં મૃતિં કદાચિદૂચે તમુપહ્વરે ગિરમ ॥ ૪.૯ ॥

અહં સ્વયં બ્રહ્મન કિંચિદસ્તિ મત પરં વિજૃંભેત યદા સ્ફુટં ચિતિઃ ।
ઈતીહ માયાસમયોપપાદિતં નિરન્વયાત સુવ્રત મા સ્મ વિશ્વસીઃ ॥ ૪.૧૦
॥

યદેતદાત્મૈક્યમુપાસ્તિચોદિતં ન મે ગુરોરપ્યપરોક્ષતાં ગતમ ।
પુરાતનાનામપિ સૌમ્ય કુત્રચિત તતો મુકુંદં ભજ સંવિદે મુદા ॥ ૪.૧૧ ॥

ઈતીદમાદિશ્ય વચો વચસ્વિનિ સ્વકે ગુરૌ લોકમથાન્યમીયુષિ ।
અસેવતાડલોચ્ય મુહુર્ગુરોર્ગિરં સ રૂપ્યપીઠાલયમિંદિરાવરમ ॥ ૪.૧૨ ॥

સુભક્તિના તેન સ ભક્તવત્સલો નિષેવિતસ્તત્ર પરં બુભુત્સુના ।
ભવિષ્યતઃ શિષ્યવરાદ્ધિ વિદ્ધિ મામ ઈતિ પ્રવિષ્ટઃ પુરુષં તમભ્યધાત ॥
૪.૧૩ ॥
પ્રતીક્ષમાણં તમનુગ્રહં મુદા નિષેવમાણં પુનરંબુજેક્ષણમ ।
સતાં ગુરુઃ કારણમાનુષાકૃતિઃ યતિં પ્રશાંતં તમુપાસસાદ સઃ ॥ ૪.૧૪ ॥

સુતં યતીંદ્રાનુચરં વિરાગિણં નિશમ્ય સંન્યાસનિષણ્ણમાનસમ ।
સુવત્સલૌ રૂપ્યતળાલયસ્થિતં વિયોગતાંતૌ પિતરૌ સમીયતુઃ ॥ ૪.૧૫ ॥

વરાશ્રમસ્તે જરતોરનાથયોર્ન જીવતોઃ સ્યાદયિ નંદનાવયોઃ ।
સયાચનં વાક્યમુદીર્ય તાવિદં પરીત્ય પુત્રાય નતિં વિતેનતુઃ ॥ ૪.૧૬ ॥

નતિર્ન શુશ્રૂષુજનાય શસ્યતે નતં ભવદ્ભ્યાં સ્ફુટમત્ર સંપ્રતમ ।
અહો વિધાત્રા સ્વયમેવ દાપિતા તદભ્યનુજ્ઞેતિ જગાદ સ પ્રભુઃ ॥ ૪.૧૭ ॥

અનુત્તરજ્ઞઃ સ તમર્થયન પુનઃ યતીંદ્રમાનમ્ય ગતઃ પ્રિયાયુતઃ ।
ગૃહે વસન કલ્પસમાન ક્ષણાન નયન સુતાનનેંદોરનિશં તતોઽસ્મરત ॥
૪.૧૮ ॥

સ ચિંતયન પુત્રમનોરથં શુચા પુનશ્ચ તીર્ત્વોપગતો મહાનદીમ ।
યતીશ્વરાનુવ્રતમાત્મનંદનં તમૈક્ષત ગ્રામવરે મઠાંતરે ॥ ૪.૧૯ ॥

સ જાતકોપાકુલિતો ધરાસુરો મહાત્મનામ લંઘનભીરુરપ્યલમ ।
સુતસ્ય કૌપીનધૃતૌ હિ સાહસપ્રતિશ્રવો મે દૃઢ ઈત્યભાષત ॥ ૪.૨૦ ॥

ક્ષણેન કૌપીનધરો નિજં પટં વિદાર્ય હે તાત કુરુષ્વ સાહસમ ।
ઈતીમમુક્ત્વા પ્રભુરબ્રવીત પુનઃ શુભાંતરાયં ન ભવાંશ્ચરેદિતિ ॥ ૪.૨૧ ॥

ન પુત્ર પિત્રોરવનં વિના શુભં વદંતિ સંતો નનુ તૌ સુતૌ મૃતૌ ।
નિવર્તમાને ન હિ પાલકોઽસ્તિ નૌ ત્વચીતિ વક્તારમમું સુતોઽબ્રવીત ॥
૪.૨૨ ॥

યદા વિરક્તઃ પુરુષઃ પ્રજાયતે તદૈવ સંન્યાસવિધિઃ શ્રુતૌ શ્રુતઃ ।
ન સંગહીનોઽપિ પરિવ્રજામિ વામ અહં તુ શુશ્રૂષુમકલ્પયન્નિતિ ॥ ૪.૨૩ ॥

બહુશ્રુતત્વાદ્યદિ તત સહે બલાત ન સા સવિત્રી વિરહં સહેત તે ।
ઈતિ દ્વિજેનાભિ હિતેઽનમત સ તં ભવાનનુજ્ઞાં પ્રદદાત્વિતિ બ્રુવન ॥ ૪.૨૪
॥

વિચિંત્ય વિદ્વાન સ નિરુત્તરીકૃતઃ તથાઽસ્તુ માતાઽનુ વદેદ યદીતિ તમ ।
ઉદીર્ય કૃચ્છ્રાદુપગમ્ય મંદિરં પ્રિયાસકાશે તમુદંતમબ્રવીત ॥ ૪.૨૫ ॥

નિશાચરારેરિવ લક્ષ્મણઃ પુરા વૃકોદરસ્યેવ સુરેંદ્રનંદનઃ ।
ગદોઽથ શૌરેરિવ કર્મકૃત પ્રિયઃ સુભક્તિમાન વિશ્વવિદોઽનુજોઽભવત ॥
૪.૨૬ ॥

કદાચિદાપ્યાઽલયબુદ્ધિરાલયં નિવેદયન પાલકમેતમેતયોઃ ।
દૃઢસ્વસંન્યાસનિષેધનિશ્ચયાં ધવાનુમત્યેદમુવાચ માતરમ ॥ ૪.૨૭ ॥
વરાશ્રમાપ્તિં મમ સંવદસ્વ માં કદાચિદપ્યંબ યદીચ્છસીક્ષિતુમ ।
યદન્યથા દેશમિમં પરિત્યજન ન જાતુ દૃષ્ટેર્વિષયો ભવામિ વઃ ॥ ૪.૨૮ ॥

ઈતિ બ્રુવાણે તનયે કદાચિદપ્યદર્શનં તસ્ય મૃતેર્નિદર્શનમ ।
વિચિંત્ય પર્યાકુલિતા ચિકીર્ષિતં સુતસ્ય કૃચ્છ્રાન્ન્યરુણન્ન સા શુભા ॥
૪.૨૯ ॥

અથોપગમ્યૈષ ગુરું જગદ્ગુરુઃ પ્રસાદ્ય તં દેવવરપ્રસાદિતઃ ।
સદા સમસ્તાશ્રમભાક સુરેશ્વરો વિશેષતઃ ખલ્વભજદ્વરાશ્રમમ ॥ ૪.૩૦ ॥

ક્રિયાકલાપં સકલં સ કાલવિદ વિધાનમાર્ગેણ વિધાય કેવલમ ।
સદા પ્રસન્નસ્ય હરેઃ પ્રસત્તયે મુહુઃ સમસ્તન્યસનં સમભ્યધાત ॥ ૪.૩૧
॥

અનંતમાત્રાંતમુદાહરંતિ યં ત્રિમાત્રપૂર્વં પ્રણવોચ્ચયં બુધાઃ ।
તદાઽભવદ ભાવિચતુર્મુખાકૃતિઃ જપાધિકારી યતિરસ્ય સૂચિતઃ ॥ ૪.૩૨ ॥

ગુણાનુરૂપોન્નતિ પૂર્ણબોધ ઈત્યમુષ્ય નામ દ્વિજવૃંદવંદિતઃ ।
ઉદાહરદ ભૂરિયશા હિ કેવલં ન મંત્રવર્ણઃ સ ચ મંત્રવર્ણકઃ ॥ ૪.૩૩ ॥

નિરંગરાગં મુખરાગવર્જિતં વિભૂષણં વિષ્ટપભૂષણાચિતમ ।
અમું ધૃતાષાઢમવેક્ષ્ય મેનિરે સ્વભાવશોભાઽનુપમેતિ જંતવઃ ॥ ૪.૩૪ ॥

ભુજંગભૂતેશવિહંગપાદિકૈઃ પ્રવંદિતઃ સાવસરપ્રતીક્ષણૈઃ ।
નનામ સોઽયં ગુરુપૂર્વકાન યતીન અહો મહીયો મહતાં વિડંબનં ॥ ૪.૩૫
॥

વરાશ્રમાચારવિશેષશિક્ષણં વિધિત્સુરસ્યાઽચરિતં નિશામયન ।
વિશેષશિક્ષાં સ્વયમાપ્ય ધીરધીઃ યતીશ્વરો વિસ્મયમાયતાઽ઼ંતરમ ॥
૪.૩૬ ॥

સ રૂપ્યપીઠાલયવાસિને યદા નનામ નાથાય મહામતિર્મુદા ।
તદાઽમુનાઽગ્રાહિ નરપ્રવેશિના ભુજે ભુજેઽનાશુ ભુજંગશાયિના ॥ ૪.૩૭ ॥

ચિરાત સુતત્વં પ્રબુભુત્સુના ત્વયા નિષેવણં મે યદકારિ તત્ફલમ ।
ઈમં દદામીત્યભિધાય સોઽમુના તદા પ્રણીય પ્રદદેઽચ્યુતાત્મને ॥ ૪.૩૮ ॥

અનુગ્રહં તં પ્રતિગૃહ્ય સાગ્રહં મુદાઽઽત્મનાઽઽપ્તાં કૃતકૃત્યતાં સ્મરન ।
અભૂદસંગોઽપિ સ તત્સુસંગવાન અસંગભૂષા નનુ સાધુસંગિતા ॥ ૪.૩૯
॥
યિયાસતિ સ્વસ્તટિનીં મુહુર્મુહુઃ નમત્યનુજ્ઞાર્થિનિ ભૂરિચેતસિ ।

તમસ્મરત સ્વામિનમેવ દૂનધીઃ ગુરુર્ભવિષ્યદ્વિરહાગ્નિશંકયા ॥ ૪.૪૦ ॥
ઈતસ્તૃતીયે દિવસે દ્યુનિમ્નગા ત્વદર્થમાસ્માકતટાકમાવ્રજેત ।
અતો ન યાયા ઈતિ તં તદાઽવદત પ્રવિશ્ય કંચિત કરુણાકરો હરિઃ ॥
૪.૪૧ ॥
તદાજ્ઞયોપાગતજાહ્નવીજલે જનોઽત્ર સસ્નૌ સહ પૂર્ણબુદ્ધિના ।
તતઃપરં દ્વાદશવત્સરાંતરે સદાઽઽવ્રજેત સા તદનુગ્રહાંકિની ॥ ૪.૪૨ ॥

ગતે દિનાનાં દશકે સમાસકે વરાશ્રમં પ્રાપ્ય સપત્રલંબનમ ।
જિગાય જૈત્રાન બહુતર્કકર્કશાન સ વાસુદેવાહ્વયપંડિતાદિકાન ॥ ૪.૪૩ ॥

ગુરોઃ સ્વશિષ્યં ચતુરં ચિકીર્ષિતઃ પ્રચોદનાત શ્રોતુમિહોપ ચક્રમે ।
અથેષ્ટસિદ્ધિશ્ફલજાતિવારિધિઃ નિરાદરેણાપિ મહાત્મનાઽમુના ॥ ૪.૪૪ ॥

તદાદ્યપદ્યસ્થમવદ્યમંડલં યદાઽવદત ષોડશકદ્વયાત્મકમ ।
ઉપર્યપાસ્તં તદિતિ બ્રુવત્યસૌ ગુરૌ તમૂચે પ્રણિગદ્યતામિતિ ॥ ૪.૪૫ ॥

ભવત્પ્રવક્તૃત્વસમર્થતા ન મે સકોપમિત્થં વદતિ વ્રતીશ્વરે ।
અપીહ માયાસમયે પટૌ નૃણાં બભૂવ તદ્દૂષણસંશયાંકુરઃ ॥ ૪.૪૬ ॥

બુધોઽભિધાનં શ્રવણં બુધેતરો ધ્રુવં વિદધ્યાદ વિમુમુક્ષુરાત્મનઃ ।
યતિર્વિશેષાદિતિ લોકચોદનાત પ્રવક્તિ માયાસમયં સ્મ પૂર્ણધીઃ ॥ ૪.૪૭
॥

અખંડિતોપન્યસનં વિસંશયં સસંપ્રદાયં પ્રવચો દૃઢોત્તરમ ।
સમાગમન શ્રોતુમમુષ્ય સાગ્રહાઃ જનાઃ શ્રુતાઢ્યાશ્ચતુરા બુભૂષવઃ ॥ ૪.૪૮
॥

ગુરોરુપાંતે શ્રવણે રતૈર્દ્વિજૈઃ સ પંચષૈર્ભાગવતે કદાચન ।
બહુપ્રકારે લિખિતેઽપિ વાચિતે પ્રકારમેકં પ્રભુરભ્યધાદ દૃઢમ ॥ ૪.૪૯ ॥

પરપ્રકારેષ્વપિ સંભવત્સુ તે વિનિર્ણયોઽસ્મિન કથમિત્યુદીરિતે ।
મુકુંદ બોધેન મહાહૃદબ્રવીત પ્રકારમેનં ભગવત્કૃતં સ્ફુટમ ॥ ૪.૫૦ ॥
નિગદ્યતાં ગદ્યમિહૈવ પંચમે જગદ્ગુરોર્વેત્થ કૃતિસ્થિતિં યદિ ।
ઈતિ બ્રુવાણે યતિસત્તમે સ્વયં તદુક્તમાર્ગેણ જગાદ ભૂરિહૃત ॥ ૪.૫૧ ॥

અશેષ શિષ્યૈશ્ચ તદાજ્ઞયા તદા પરીક્ષણાયૈક્ષિ સમસ્તપુસ્તકમ ।
સ તત્ર હંતૈકતમે સ્થિતં ત્યજન ન તાવદધ્યાય નિકાયમભ્યધાત ॥ ૪.૫૨
॥

અત્ર જન્મનિ ન યત પઠિતં તે જૈત્ર ભાતિ કથમિત્યમુનોક્તે ।
પૂર્વજન્મસુ હિ વેદ પુરેદં સર્વમિત્યમિતબુદ્ધિરુવાચ ॥ ૪.૫૩ ॥

ઈતિ બહુવિધવિશ્વાશ્ચર્યચિત્તપ્રવૃત્તેઃ
જગતિ વિતતિમાયન્નૂતનાઽપ્યસ્ય કીર્તિઃ ।
ક્ષપિતતતતમસ્કા ભાસ્કરીવ પ્રભાઽલં
સુજનકુમુદવૃંદાનંદદા ચંદ્રિકેવ ॥ ૪.૫૪ ॥

॥ ઈતિ શ્રીમત્કવિકુલતિલક ત્રિવિક્રમપંડિતાચાર્યસુત
નારાયણપંડિતાચાર્યવિરચિતે શ્રીમધ્વવિજયે
આનંદાંકિતે ચતુર્થઃ સર્ગઃ ॥